श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ चतुर्थस्कन्धे तृतीयोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ चतुर्थस्कन्धे तृतीयोऽध्यायः ॥

मैत्रेय उवाच
सदा विद्विषतोरेवं कालो वै ध्रियमाणयोः।
जामातुः श्वशुरस्यापि सुमहानतिचक्रमे ॥ 1 ॥

यदाभिषिक्तो दक्षस्तु ब्रह्मणा परमेष्ठिना।
प्रजापतीनां सर्वेषामाधिपत्ये स्मयोऽभवत् ॥ 2 ॥

इष्ट्वा स वाजपेयेन ब्रह्मिष्ठानभिभूय च।
बृहस्पतिसवं नाम समारेभे क्रतूत्तमम् ॥ 3 ॥

तस्मिन् ब्रह्मर्षयः सर्वे देवर्षिपितृदेवताः।
आसन् कृतस्वस्त्ययनास्तत्पत्न्यश्च सभर्तृकाः ॥ 4 ॥

तदुपश्रुत्य नभसि खेचराणां प्रजल्पताम्।
सती दाक्षायणी देवी पितुर्यज्ञमहोत्सवम् ॥ 5 ॥

व्रजन्तीः सर्वतो दिग्भ्य उपदेववरस्त्रियः।
विमानयानाः सप्रेष्ठा निष्ककण्ठीः सुवाससः ॥ 6 ॥

दृष्ट्वा स्वनिलयाभ्याशे लोलाक्षीर्मृष्टकुण्डलाः।
पतिं भूतपतिं देवमौत्सुक्यादभ्यभाषत ॥ 7 ॥

सत्युवाच
प्रजापतेस्ते श्वशुरस्य साम्प्रतं
    निर्यापितो यज्ञमहोत्सवः किल।
वयं च तत्राभिसराम वाम ते
    यद्यर्थितामी विबुधा व्रजन्ति हि॥ 8॥

तस्मिन् भगिन्यो मम भर्तृभिः स्वकै -
    र्ध्रुवं गमिष्यन्ति सुहृद्दिदृक्षवः।
अहं च तस्मिन् भवताभिकामये
    सहोपनीतं परिबर्हमर्हितुम्॥ 9॥

तत्र स्वसॄर्मे ननु भर्तृसम्मिता
    मातृष्वसॄः क्लिन्नधियं च मातरम्।
द्रक्ष्ये चिरोत्कण्ठमना महर्षिभि -
    रुन्नीयमानं च मृडाध्वरध्वजम्॥ 10॥

त्वय्येतदाश्चर्यमजात्ममायया
    विनिर्मितं भाति गुणत्रयात्मकम्।
तथाप्यहं योषिदतत्त्वविच्च ते
    दीना दिदृक्षे भव मे भवक्षितिम्॥ 11॥

पश्य प्रयान्तीरभवान्ययोषितो -
    ऽप्यलङ्कृताः कान्तसखा वरूथशः।
यासां व्रजद्भिः शितिकण्ठ मण्डितं
    नभो विमानैः कलहंसपाण्डुभिः॥ 12॥

कथं सुतायाः पितृगेहकौतुकं
    निशम्य देहः सुरवर्य नेङ्गते।

अनाहुता अप्यभियन्ति सौहृदं
    भर्तुर्गुरोर्देहकृतश्च केतनम् ॥ **13** ॥

तन्मे प्रसीदेदममर्त्य वाञ्छितं
    कर्तुं भवान्कारुणिको बतार्हति।
त्वयाऽऽत्मनोऽर्धेऽहमदभ्रचक्षुषा
    निरूपिता मानुगृहाण याचितः ॥ **14** ॥

ऋषिरुवाच
एवं गिरित्रः प्रिययाभिभाषितः
    प्रत्यभ्यधत्त प्रहसन् सुहृत्प्रियः।
संस्मारितो मर्मभिदः कुवागिषून्
    यानाह को विश्वसृजां समक्षतः ॥ **15** ॥

श्रीभगवानुवाच
त्वयोदितं शोभनमेव शोभने
    अनाहुता अप्यभियन्ति बन्धुषु।
ते यद्यनुत्पादितदोषदृष्टयो
    बलीयसानात्म्यमदेन मन्युना ॥ **16** ॥

विद्यातपोवित्तवपुर्वयःकुलैः
    सतां गुणैः षड्भिरसत्तमेतरैः।
स्मृतौ हतायां भृतमानदुर्दृशः
    स्तब्धा न पश्यन्ति हि धाम भूयसाम् ॥ **17** ॥

नैतादृशानां स्वजनव्यपेक्षया
    गृहान् प्रतीयादनवस्थितात्मनाम्।
येऽभ्यागतान् वक्रधियाभिचक्षते
    आरोपितभ्रूभिरमर्षणाक्षिभिः ॥ **18** ॥

तथारिभिर्न व्यथते शिलीमुखैः
    शेतेऽर्दिताङ्गो हृदयेन दूयता।
स्वानां यथा वक्रधियां दुरुक्तिभि -
    र्दिवानिशं तप्यति मर्मताडितः॥ **19** ॥

व्यक्तं त्वमुत्कृष्टगतेः प्रजापतेः
    प्रियाऽऽत्मजानामसि सुभ्रु सम्मता।
अथापि मानं न पितुः प्रपत्स्यसे
    मदाश्रयात्कः परितप्यते यतः॥ **20** ॥

पापच्यमानेन हृदाऽऽतुरेन्द्रियः
    समृद्धिभिः पूरुषबुद्धिसाक्षिणाम्।
अकल्प एषामधिरोढुमञ्जसा
    पदं परं द्वेष्टि यथासुरा हरिम्॥ **21** ॥

प्रत्युद्गमप्रश्रयणाभिवादनं
    विधीयते साधु मिथः सुमध्यमे।
प्राज्ञैः परस्मै पुरुषाय चेतसा
    गुहाशयायैव न देहमानिने॥ **22** ॥

सत्त्वं विशुद्धं वसुदेवशब्दितं
    यदीयते तत्र पुमानपावृतः।
सत्त्वे च तस्मिन् भगवान् वासुदेवो
    ह्यधोक्षजो मे नमसा विधीयते॥ **23** ॥

तत्ते निरीक्ष्यो न पितापि देहकृद्
    दक्षो मम द्विट् तदनुव्रताश्च ये।
यो विश्वसृग्यज्ञगतं वरोरु मा -
    मनागसं दुर्वचसाकरोत्तिरः॥ **24** ॥

**यदि व्रजिष्यस्यतिहाय मद्वचो**
**भद्रं भवत्या न ततो भविष्यति।**
**सम्भावितस्य स्वजनात्पराभवो**
**यदा स सद्यो मरणाय कल्पते॥ 25॥**

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
चतुर्थस्कन्धे उमारुद्रसंवादे तृतीयोऽध्यायः॥